Vibhūticandra

# Pramāṇavārttika Pariśiṣṭa 1

— Appendix I to the Pramāṇavārttika

SARIT

SARIT

# Contents

Contents i

I Appendix I :परिशिष्टं १ पुस्तकान्ते कर्गदपत्रेषु विभूतिचन्द्रेणैव लिखितम् । ३

१ १ ५

२ २ ५

३ ३ ७

४ ४ १३

५ ५ १३

६ ६ १४

७ ७ १५

८ ८ :अभावः १५

९ ९ :भूतचैतन्यमतनिरासः १५

१० १० :हेतुः १७

११ ११ १८

१२ १२ २०

१३ १३ २०

The TEI Header २२

Pramāṇavārttika Pariśiṣṭa 1 *Vibhūticandra*

515/s

# Part I

[

Appendix I:परिशिष्टं १ पुस्तकान्ते कर्गदपत्रेषु विभूतिचन्द्रेणैव लिखितम् ।]Appendix I: परिशिष्टं १पुस्तकान्ते कर्गदपत्रेषु विभूतिचन्द्रेणैव लिखितम् ।

# १ १

*१।२ अ...था । कस्मादयं वार्त्तिकन्यायेन प्र मा ण स मु च्च यं 1a/MA व्याचष्टे न पुनः स्वतन्त्रमेव शास्त्रमिति प्रश्ने प्राह । **प्राय** इत्यादि[।] अयमर्थः । चिन्तया करुणया च मे प्रमाणसमुच्चयव्याख्यायां चेतो जाताभिलाषं **दिग्नाग**रचितशास्त्रस्यास्योपकारित्वेन । तच्च श्रोतृजनापराधेन । पदार्थस्तूच्यते [।] प्रायो बाहुल्येन प्राकृतसक्तेर्ज्ञानानीचो(?)दुष्टान्वयः । तीर्थिकशास्त्राणि आचार्यनीतिदूषणानि विपर्यस्तज्ञानप्रभवत्वात् दुष्टान्वयान्यतश्च प्राकृतानि तेषु सक्तिरनुरागो यस्य । कुतः प्राकृतसक्तिरित्याह । प्रतिबलप्रज्ञ इति अतोसौ दुर्भाषितमपि सुभाषितं कृत्वा त्यज्यते । अप्रतिबलप्रज्ञत्वादेव चाचार्यसुभाषितानि स्वयं यथावद् बोद्धुमक्षमो दोषवत्त्वेन गृहीत्वा तैराचार्यसुभाषितैरनर्थी आचार्ये च विद्वेषवान्भवतीत्याह [।] **केवल**- मित्यादि [।] न केवलमनर्थी सुभाषितैराचार्यीयैरपि तु विद्वेष्ट्यपीर्ष्यामलैः परिगतः सन् दिग्नागं । किं भूतं सूक्ताभ्यासविवर्द्धितव्यसनं । व्यवहितानामपि सम्बन्धोस्ति[।] शोभनमुक्तं सूक्तं तत्राभ्यासस्तत्र विवर्द्धितं व्यसनं तत्रैव चात्यर्थमासक्तत्वं अनेनोपचितपुण्यज्ञानत्वमाह । तस्यैव तथात्वात् । येनानर्थी प्राकृतसक्तिस्तेन कारणेन स मु च्च यो न परोपकारः परमुत्कृष्टं । अन्योपकारोस्त्येव प्रायशब्दसूचितः [।] इतिर्हेतौ । इति हेतोर्नास्माकं चिन्ता [।] महार्थमपीदं शास्त्रं न **बहूनामुपकारकं** तत्कथमस्यार्थसाफल्यं कुर्यामित्येवमाकारा । आचार्ये विद्वेषः अन्योप्यनर्थहेतुरतो महा नाचार्यनीतेन विपरीतार्थप्रकाशनेनाचार्ये बहुमानमुत्पाद्यानर्थहेतोर्जनं निवर्त्तयिष्यामीत्येवंदुःख वियोगेच्छाकारा करुणाप्यपि शब्दात् । **अत्रानुबद्धस्पृह**मिति द्वितीयेनेति शब्देन चिन्ताकरुणयोर्हेतुत्वमाह । इति चिन्ताकरुणाभ्यां चेतश्चिरन्दीर्धकालं प्र मा ण स मु च्च य-व्याख्याभूतवार्तिकरचनायामनुबद्धस्पृहं सन्तानेन प्रवृत्तेच्छमिति ॥ §1

# २ २

516/s

१ *] प्रायः प्राकृते १।२ त्यादि कारिकायाम् ।

2b/MA १।२ एतदाह[।]प्र मा ण स मु(च्च)योत्र शास्त्रकृता व्याख्यातुं प्रस्तुतस्तत्र प्रथमं तन्नमस्कारश्लोकार्द्धं व्याख्यानार्हं द्वितीयपरिच्छेदेन व्याख्यातं । तृतीयपरिच्छेदेन तु प्रत्यक्षलक्षणं सप्रभेदमशेषविमतिनिराकरणेन यथास्वरूपतो विभक्तम् [।] अवसरप्राप्तमनुमानं [।] तच्च द्विधा [।] स्वार्थं परार्थञ्च [।] तत्राद्यमा (दा) वेव व्याख्यातं [।] प्रथमञ्च तद्व्याख्यानप्रयोजनमुक्तमर्थानर्थविवेचनस्यानुमानायत्तत्वादित्यनेन प्रत्यक्षमपि ह्यनु(मान)बलादेव प्रामाण्यं लभते इत्यादि व्याख्यातं [।] व्याख्येयसूत्रन्त्वनुमानं द्विधा त्रिरूपलिङ्गतोर्थदृगित्यादिकं प्र मा णस मु च्च ये द्वितीयपरिच्छेद उक्तं । तृतीयपरिच्छेदप्रोक्तन्तु परार्थमनुमानं स्वदृष्टार्थप्रकाशनमित्यादिकं वार्तिकचतुर्थपरिच्छेदेन व्याख्याय इत्ययमेव वार्तिकप्रथमादिपरिच्छेदानामनुक्रमनिर्देशः । §2

वार्तिकञ्च विशेषाभिधानादिरूपं यथोक्तं सूत्राणामनुपपत्तिचोदनात्तत्परिहारो विशेषाभिधानमिति लक्षणमयमेवार्थः परोक्तः । §3

सूत्राणान्दोषमुद्भाव्य परिहारो यत्र दीयते ।
विशेषचोदना चापि वार्तिकं तत्प्रकीर्त्तितमिति ।§5

स मु च्च य सूत्रे स्वदृष्टार्थपदं व्याख्यातुं शास्त्रकृदाह । परस्य प्रतिपाद्यत्वा दित्यादि । सुवचार्थस्तु वृत्तावुच्यते । स्वार्थमिति स्वस्मै इदं स्वार्थमर्थेन न नित्यसमासः सर्वलिङ्गता चेति वाक्येन चतुर्थी समासः । स्वप्रयोजनमित्यर्थः । येन स्वयमनुमेयं प्रतिपद्यते ज्ञानेन तत्स्वार्थं [।] परस्मै इदं परार्थं येन परेभ्यः प्रतिपादयति त्रिरूपवचनेन तत्परार्थं । §6

ननु प्रमाणमविसम्वादीत्युक्तं अनुमानञ्च प्रमाणं ज्ञानं स्यात्कथं वचनं न दोषः उपचारात् परमार्थतस्तु ज्ञानमेवात्रापि परिच्छेदकं त्रिरूपवचने तस्यैव सूचनात् [।] वचनेनैव हि परोवबोध्यते न ज्ञानेन [।] महती चात्र विमतिः परेषामितीदं विवेच्यते । स्वार्थानुमानमवसरप्राप्तमिति 2a/MA सङ्गत्यानन्तरं नेदिष्टत्वात्पूर्वमेवेति प्रथमं भूतं पदद्वयं व्याचक्षाणेनान्वयव्यतिरेकविचारात्प्र मा ण स मु च्च यस्य चतुर्थपरिच्छेदो [दृष्टान्तविचार उक्तोऽन्यापोहव्याख्यानेन पञ्चमपरिच्छेदोऽन्यापोहविचारः समर्थितः सर्वस्य विशेषणविशेष्यादिशाब्दव्यवहारस्यान्यापोह एव योगात् । हेत्वाभासास्ततो परइत्यनेन तु हेत्वाभासविचारः षष्ठः परिच्छेदः समर्थितः [।] §7

2b/MA पुर्वापरपरिच्छेदयोरनुसन्धानं कुर्वन्नाचार्य दे वे न्द्र बु द्धिः । शिष्याणां सुखबोधार्थं प्र मा ण वा र्ति क शरीरमाख्यातुमाशङ्कितञ्च परिहर्त्तुं प्रथमपरिच्छेदार्थानुसन्धानमप्याह । आचार्यीये त्यादि । इयञ्चात्राशङ्का[।] 517/s यद्याचार्य ध र्म की र्ति ना प्र मा ण स मु च्च यो व्याख्यातुं प्रस्तुतस्तदा स एव व्याख्यायतां किमित्यादावुत्क्रम्यानुमालक्षणं व्याख्यातवान् इति [।] अस्य परिहारः । आचार्यीयेत्यादि । आचार्योत्र दि ग्ना ग स्तेन प्रणीतं य-

त्प्रमाणलक्षणशास्त्रं प्रत्यक्षानुमानस्वरूपप्रकाशकं प्र मा ण स मु च्च याख्यं तन्नीतेरेवोद्योतयितुं प्रस्तुतत्वात् तस्य विविधप्रकारं विशेषेण च वार्तिकरूपेण पूर्वटीकाकारा सद्वयाख्यां तीर्थिकविम(ि)तञ्चापनीय यथास्थितव्याख्यानं व्याख्या । तस्या निबन्धनमनुमानं न प्रत्यक्षं तस्यानभिलाप्यवस्तुभेदविषयत्वेन निर्विकल्पकतया स्वार्थोपयोगित्वात् । §8

अनुमाने तु सा निबध्यते सर्वविमतिनिराकरणा(य) यथास्थिताविपरीतवस्तुस्वरूपस्यानेनाख्यापनात् । व्यवस्थाप्येति विशेषेण प्रतिबन्धाख्यानतस्त्रिरूपतया पूर्वमवस्थाप्येत्यर्थः । पूर्वकालभाविक्त्वाप्रत्ययेन हि पूर्वकालतास्य ज्ञाप्यते तथा चाशङ्कितचोद्यपरिहारः । स्वतः प्रामाण्यञ्चास्य सूच्य- 2b/MA तेऽनुमानं हि सुनिश्चितत्रिरूपतया विकल्पकत्वेनात्यन्तनिश्चायकत्वात् । स्वतः प्रमाणमनेनैव चाशेषविमत्यपाकरणं तीर्थिकनिग्रहः (आ)प्तवचनार्थव्यवस्थानं सर्वज्ञतासाधनञ्च क्रियते न प्रत्यक्षेणेति । एतदेव पूर्वं व्यवस्थापितं प्रत्यक्षस्याप्येतद्बलादेव प्रामाण्यनिश्चयः । प्रत्यक्षरूपं हि तदाभासेपि संभवति । बोधरूपताया अर्थाकार.............. §9

## ३ ३

१।२ सस्पष्टप्रतिभासस्य च निर्विकल्पकत्वेन द्विचन्द्रादिज्ञानेपि संभवान्नैवमनुमानस्य स्वाभासेषु निश्चितत्रैरूप्यसम्भव इत्यनुमानभूतकारणशुद्धिद्वारेणैव प्रत्यक्षस्य प्रामाण्यं निश्चेयं । यद्यप्यान्ये(?)षितमात्रं यथावस्तु 3a/MA प्रवर्त्तते प्रत्यक्षन्तदप्यसकृत्प्रवर्त्तितव्यवहारतयान्वयव्यतिरेकाभ्यां विवेचितवस्वाकारं यथार्थं सम्वेद्यत इत्यनुमानपूर्वकमेवैतदन्वयव्यतिरेकयोरनुमानरूपत्वात् । दृश्यते चाभ्यासातिशयात्प्रत्यक्षमुत्पद्यमानमेव प्रमाणं मणिरूप्यादिविषयज्ञानवत्तथा विधतत्स्वत एव प्रमाणं भ्रान्तिनिमित्तस्याभ्यासेनैव निराकृतत्वात् । अन्यथा कथं लिङ्गज्ञानं प्रमाणं स्यात् । यत्र तु क्वचिद्विषये भ्रान्तिनिमित्तापनयासमर्थन्तत् तत्रानुमानानिश्चय इति तत्पूर्वमुक्तं । नन्वनुमानमपि प्रत्यक्षपूर्वमेव नायन्नियमो व्याप्तेरनुमानेन निश्चयात् । न हि व्याप्तिर्व्यापकस्य तत्र भाव एव । व्याप्यस्य वा तत्रैव भाव इत्ययं नियमोऽध्यक्षेणेक्षते । लिङ्गमपि गृहीतसम्बन्धेनैव पुंसा निश्चीयते इति सम्बन्धापेक्षणात्तदप्यनुमानपूर्वकमेव । न चानुमानप्रतिभासकाले प्रत्यक्षं व्याप्रियते इत्युक्तं । न हि प्रत्यक्षप्रतिभासवत् स्वाभासेऽनुमानं सम्भवतीत्यप्युक्तं । अतोनुमानमुक्तार्थसाधकत्वात् पूर्वमुक्तं [।] अथवा लक्ष्यन्ते स्कन्धधात्वायतनानि येन शास्त्रेण तल्लक्षणशास्त्रं त्रिपिटकं [।] प्रमाणञ्च तदविसंवा दित्वाल्लक्षणशास्त्रं चेति प्रमाणलक्षणशास्त्रं भगवत्प्रवचनं 518/s न तीर्थिकानामिव शास्त्रं विसम्वादकमलक्षणञ्च वस्तुस्वरूपस्येति भावः । तथा हि भगवतां वचनं प्रमाणोपपन्नमनित्यादिवस्तुरूपसम्बेद्यकं चाथवा प्रमाणं प्रत्यक्षानुमाने तयोर्लक्षणं भगवतैव निर्दिष्टं [।] यथोक्तम भि 3b/MA

ध र्मे चक्षुर्विज्ञानसमङ्गी पुद्गलो नीलं जानाति । नो तु नील मित्यनेन निर्विकल्पकं प्रत्यक्षमिन्द्रियज्ञानमुक्तं [।] मनोविज्ञानसमङ्गी तु नीलं जानाति नीलमिति द्विति । अत्राद्येन मानसं निर्विकल्पकं प्रत्यक्षमुक्तं द्वितीयेन तु विकल्पकं मन उक्तं । सम्वित्तिस्तु जानातिवचनेनोक्ता । न हि स्वयमप्रकाशमन्यं प्रकाशयति बाह्यप्रकाशवत् विशेषवचनमप्यस्त्यनुभवरूपं ज्ञानमितिवचनात् । योगिज्ञानमपि श्रुतचिन्ताभावनाक्रमेण तत्रैवोक्तं [।] कार्यानुमानस्य तु लक्षणं [।] । § 10

धूमेन ज्ञायते वह्निः सलिलञ्च वलाकया ।
निमित्तैर्ज्ञायते गोत्रं बोधिसत्त्वस्य धीमत इति ॥§ 12

स्वभावहेतोर्लक्षणं [।] § 13

अनित्या वत संस्कारा उत्पादव्ययधर्मिणः ।
उत्पद्य हि निरुध्यन्ते तेषां व्युपशमः सुखमिति ।§ 15

अत्र हि तद्भावमात्रानुबन्धित्वं साध्यधर्मस्योक्तमिति स्वभावोयमुक्त एतत्प्रमाणं येन शास्यते भगवद्वचनेन तत्प्रमाणलक्षणशासकं वचनं शास्त्रं[।] तद् भगवदुक्तं प्रमाणलक्षणमाचार्य दि ग्ना गे न व्याख्यातं प्र मा ण स मु च्च ये नेत्याचार्यीयप्रमाणलक्षणशास्त्रस्य व्याख्यातस्यानिबन्धनमनुमानं अत्र वार्तिके प्रथमव्यवस्थापितमुक्तप्रयोजनार्थमित्यर्थः । अवसरप्राप्तमिति सर्वत्रैव सन्तो नमस्कारपूर्वकं प्रवर्त्तन्त इति सदाचारानुवृत्यर्थं विघ्नोपशमनार्थञ्चाचार्येण प्र मा ण स मुच्च ये भगवतो नमस्कारश्लोक उक्तः । नमस्कारेण हि पुण्योपचयो भवति । स च पापं निवर्त्तयति विरोधात् । पापञ्च निवर्त्तमानं स्वकार्यमपि विघ्नं निवर्त्तयतीति विघ्नोपशमनो भवति । भगवत्प्रामाण्यनिबन्धनश्चानुमानमनन्तरमुक्तमित्यवसरप्राप्ता व्याख्या भवति नमस्कारश्लोकस्य ।

प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने ।
प्रमाणसिद्धयै स्वमतात्समुच्चयः करिष्यते
विप्रसृतादिहैकत(ः) ।§ 18

प्रमाणसमुच्चये १।१ इत्यस्य ॥ § 19

4a/MA तत्र यथा प्रत्यक्षादिप्रमाणं पुरुषार्थोपयोगिनोनधिगतस्यार्थस्य प्रकाशकं सम्वादकञ्च तथा भगवानपि यत्रोत्कृष्टः पुरुषार्थः प्रतिबद्धश्चतुरार्यसत्यलक्षणे तत्त्वे तद्विषयं हि ज्ञानमासाद्य मोक्षार्थिनां मोक्षाधिगमात् । तस्य
519/s ह्यनधिगतस्य प्रकाशकोऽविसम्वादकश्च भगवान्नान्यः इति प्रमाणसाधर्म्यात्प्रमाणं । भूत उत्पन्नः । भूतवचनमप्रजातस्येश्वरादेः परपरिकल्पित-

नित्यस्य प्रतिषेधार्थमिवार्थस्तु सामर्थ्यगत इति न तदर्थमेतदिति वक्ष्यते ।
प्रमाणञ्चासौ भूत श्चेति प्रमाणभूतः । तस्मै प्रमाणभूताय प्रणम्येति योज्यम्
। § 20

ननु च प्रणमनक्रियया व्याप्यमानत्वात् द्वितीययात्र भवितव्यं तत्कथं
चतुर्थी [।] न चेयं नमः शब्दयोगे युज्यते नमःशब्देन सकारान्तेन नाम्ना
तस्याविधानात् [।] न च प्रणम्येत्यत्र ल्यबन्ते सोस्ति । ल्यबन्तस्यैकदेश-
स्याप्रतिपादकत्वादसकारान्तत्वाच्च ॥ § 21

उच्यते । क्रियाग्रहणमपि कर्त्तव्यमिति का त्या य न वचनात्पत्ये
शेते इत्यादिवदत्र चतुर्थी । भा ष्य कृ ता त्वयं सूत्रार्थ एवं वर्णितः ।
प्रार्थनाध्यवसायादिक्रियया प्राप्तुमिष्टतमत्वाल्लब्धकर्मव्यपदेशया प्रणतिक्रिय-
याऽभिप्रियमाणस्य संप्रदानत्वविवक्षायामत्र चतुर्थी । यदा तु क्रियामात्रं
क्रियान्तराव्याप्त्या विवक्ष्यते तदा कर्मणि द्वितीया । एवञ्च न्यायमाश्रित्य
गत्यर्थकर्मणीत्यादीसूत्रं प्रत्याख्यातम् । अमुना न्यायेनैव द्वितीयाचतुर्थ्योः
सिद्धत्वात् न चातिप्रसंगः शिष्टप्रयोगानुसारितया लौकिकविवक्षासमाश्र-
यादन्यत्रापि विवक्षानियमेनैव साधुत्वं दृश्यते । यथा ब्रूम इत्यादौ प- 4b/MA
रस्मैपदमन्यथा कर्त्रभिप्राये क्रियाफल इत्यात्मनेपदमत्र स्यात् । वक्ता 4b/MA
हि परं बोधयितुं वचनमुच्चारयन् क्रियाफलयोगी भवतीति नियतात्रात्म-
नेपदप्राप्तिः । अनुच्चारणव्यवच्छेदेन तु यदोच्चारणं विवक्ष्यते तदा न न
ब्रूमोऽपि तु ब्रूम एवेत्येतावन्मात्रविवक्षायां परस्मैपदं संगतमेवेत्यदोषः । सुत्र-
कारमतेनाप्यनुगतार्था संप्रदानसंज्ञेत्यत्रापि कायवामङ्मनःप्रणामेन भगव-
न्तमात्मसात्कुर्वन् स्तोत्रकर्त्ता च भगवते आत्मानं निवेदयतीति ददाति [।]
क्रियाव्याप्येन प्रणतिकर्मणाऽभिप्रीयमाणतास्तीति न्याय्यैव संप्रदाने चतुर्थीति
मु नि त्र य मतेप्यविरुद्धं साधुत्वं । जगद्धितैषिणे इति जगद्धितं सा ह्यपाय-
हेयोपादेययोरात्यन्तिके दानोपादाने तदेषणशीलाय प्रणम्य कायवाङ्मनोभिः
प्रणामं कृत्वा स मु च्च यः करिष्यते इति सम्बन्धः। एतेन प्रणामतः पूजा
विहिता [।]शास्त्रे इति तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटावित्यौणादिक
इट् प्रतिषेधः । दुःखक्षयोपायोपदेशः शासनं । तच्चात्र हेत्ववस्थाभाव्यभिप्रेतं
। सुगतायेति । फलावस्थानाभिधानात्तच्छासनं कुर्वन् भगवान् बोधिसत्वाव-
स्थायां शास्तृशब्देनोक्तो मध्ये तु नमस्कारेणोभयावस्थायाः प्रणम्य तामाह
। उभयी चावस्था हेतुफलरूपा हेत्ववस्था चाशयप्रयोगरूपा [।] आशयोपि
द्विधा सर्वसत्वत्राणाकारो बोध्यालम्बनः । प्रयोगोपि द्विधा विमुक्तिचर्याभावी
भूमिगतश्च अधिमुक्तौ च प्रायोगि को दानादयः । भूमौ तु वैपाकिकाः 520/s
पारमिताख्याः[।] तेपि द्विधा साभिसंस्कारान भिसंस्कारभेदेन । भूमयो 5a/MA
हि सप्त साभिसंस्काराः । आभोगनिमित्तबलेन समाधेः प्रवर्तनात्तत्रापि
सप्तम्यां निमित्तं निवर्त्तते नाभोगं निमित्तशङ्कासद्भावादष्टम्यान्त्वाभोगोपि
निवर्तते शुद्धिभूमिप्राप्त्योभयनिवृत्तेः स्वरसवाही समाधिर्भवति । यद्बलात्स-
र्वजगदर्थसम्पादको भवति । सर्वसंविल्लाभाय सर्वानुशासको भवति । सा

चेयं हेत्ववस्था भगवतश्चित्तोत्पादादारभ्य बोधिमण्डोपसंक्रमणमारविध्वंसनवज्रोपमसमाधिपर्यन्ता दशपारमितात्मिका । फलन्त्वेकादशी भूमिः । क्षयानुत्पादज्ञानं बोधिः । हेत्ववस्था चादावेव चतुःसम्पदा विशिष्यमाणत्वात्सर्वेभ्योऽतिशयवती । § 22

अशेषपुण्यज्ञानसम्भाराभ्यासो निरन्तराभ्यासो दीर्घकालाभ्यासः सत्कृत्याभ्यासश्चेति सम्पच्चतुष्टयं । इहैव जन्मनि काव्यशास्त्रकलादिष्वभ्यासान्निरतिशया गुणप्रकर्षसम्पज्जायते [।] याऽन्येमं साप्यशक्या चिन्तयितुं । तथैकजन्मोपात्तकुशलेन देवादौ निरतिशयाष्टगुणैश्वर्यादिप्रकर्षसंपद् भवति [।] किंपुनर्वशिताप्राप्तोऽपरिमितानन्यकल्पाभ्यासोपचीयमानपुण्यज्ञानसम्भारो न यास्यति परां सम्पदमित्य(स)म्भाव्यमेतत् । कारणविशेषाच्च कार्य विशिष्यत इति फलसम्पदपि चतुर्धा विशिष्यते । प्रहाणज्ञानरूपकायप्रभावचतुःसंपद्योगात् । प्रहाणसंपदपि चतुर्धा प्रकथ्यते । सर्वह्रे(?)णं प्रहाणमत्यन्तप्रहाणं सर्वसमाधिसमापत्त्यावरणप्रहाणञ्च । ज्ञानसम्पदपि चतुर्धा विशिष्यते । सर्ववस्तुज्ञानं अनुपदिष्टज्ञानं अयुग्मज्ञानञ्च । रूप- 5b/MA कायसंपदपि चतुर्विधा लक्षणसंपत् द्वात्रिंशन्महापुरुष लक्षणप्रतिलम्भांत् । 5b/MA अनुव्यञ्जनसम्पद शीत्यनुव्यञ्जनप्राप्तेः । बलसंपन्नारायणबलसमन्वितत्वात् । वज्रसारास्थिशरीरतासम्पत् दृढाभेद्यशरीरत्वात् । **प्रभावसम्पदपि चतुर्विधा । बाह्य**विषयनिर्माणपरिणमनाधिष्ठानवशित्वसम्पत् । आयुरुत्सर्गाधिष्ठानवशित्वसम्पत् । आवृताकाशसुदूरक्षिप्तगमनाल्पबहुप्रवेशनवशित्वसम्पत् । विविधनिजाश्चर्यसर्वधर्मसम्पच्च । उपकारसम्पदपि उभयावस्थाभाविनी चतुर्धा विव(?)शिष्यते । धर्मचक्रप्रवर्त्तनापायत्रयसंसारदुःखात्यन्तनिर्मोक्षस्वभावतो यानत्रयसुगतिप्रतिष्ठापनतो वा ॥ § 23

सुगतायेति सुष्ठु गतः प्राप्तः सर्वथा सर्वहेयप्रहाणं ज्ञानादिसम्पदञ्चेति [।] सुगतः शोभनं वा गतोऽनुबुद्धवानिति सुगतो [।] ज्ञानार्थोत्र गतिः पूर्वत्र तु प्राप्तिवचनः । अनेन तु स्वार्थसम्पत्फलावस्थाभाविन्युक्ता । पूर्वन्तु हेतुभाविनी परार्थसम्पदुक्ता निरूपमां फलावस्थाभाविनीं परार्थसम्पदमाह । तायिने इति । तायतेऽनेनेति तायः सुदृष्टमार्गोपदेशः । सोऽस्यास्तीति तायी । प्रेक्षावदारम्भाणां प्रयोजनेन व्याप्तत्वात्साक्षात्प्रयोज- 521/s नमाह । प्रमाणसिद्ध्यै इति । प्रमाणव्युत्पत्तये स्वप्रयोजनत्वान्नारब्धव्यमिदं प्रमाणसिद्धेर्न्या य मु खा दिनैव साधितत्वात् [।] यत् साधितं तत्र साध्यते यथा सिद्ध ओदनः इति [।] व्यापकविरोधमाशङ्क्याह [।] **स्वमताद्विप्रसृतादिति** हेतौ पञ्चमी [।] विस्तृतप्रकरणतार्थो हि दुःखेनावधार्यत इति सुखबोधायेहैकत्र व्यवस्थापितोऽशेषविमत्यपाकरणेनेति न पुनरुक्तता दोषः । एकत इति सप्तम्यर्थे तसि (◌ः) । श्लोकश्चायं प्रमाणकथनप्रस्तावाद् भगवत्प्रामाण्यसाधकोऽनुलोमप्रतिलोमतो ज्ञेयः । § 24

प्रमाणं भगवान् जगद्धितैषित्वात् । यतश्च जगद्धितैषी अतः शास्ता [।] यतश्च शासकोतो गोत्रभेदेन प्राज्ञजातीयत्वात् सुगतः। सुगतत्वाच्च 6a/MA सर्वजगत्त्रायकोऽतोयं प्रमाणमिति अनुलोमव्याख्या । § 25

प्रतिलोमतस्तु प्रमाणं तायित्वात् । तायित्वं सुगतत्वात् । तच्च शास्तृत्वात् । एतच्च जगद्धितैषित्वात् । कार्यतः कारणानुमानमिति व्याख्याभेदः । तदत्र श्लोके शास्त्रकृता प्रथमार्द्धे पञ्च पदानि प्रणम्येत्येतत्त्यक्त्वाऽमुना परिच्छेदेन व्याख्यायन्ते । नाधिकं सुगमत्वादिति [।] § 26

व्याख्येयार्हव्याख्यानात् श्लोकव्याख्येत्याह । प्रायश्चाध्यारोपितगुणा स्तुतिरन्यदेवतानां । भगवतस्त्वप्रतिसममहद्भूतगुणा स्तुतिरिति प्रतिहता अप्यत्र प्रवर्त्तन्ते । मध्यस्था अभिप्रसीदन्ति । अभिप्रसन्नास्त्वत्यन्तमेव तत्र वृंहितभक्तयो भवन्ति । इति स्तोत्रकर्त्तुः परेषाञ्च पुण्योपचयो भवति । व्याख्यातुरपि तथैव सर्वं सम्पद्यते [।] यथोक्तं [।] § 27

स्तोत्रकर्त्तुर्यथा पुण्यं स्तुतेर्भुवि प्रवर्त्तते ।
तद्व्याख्यातुस्तथा सर्वमिति व्याख्या प्रवर्त्तते ।§ 29

ताञ्च शास्त्रकृदाह । प्रमाणमविसम्वादि ज्ञानमि १।३ त्यादि । वार्त्तिकरूपेण चेयं व्याख्या । तल्लक्षणत्वादित्यर्थाक्षिप्तं । वार्त्तिकस्य च लक्षणमुक्तं । वक्ष्यते व्याख्या चोद्देशनिर्देशापेक्षाक्षेपातिदेशादिलक्षणा तत्र युक्तात्र योज्या । तत्रोद्देशनिर्देशौ समासव्यासकथनं । अपेक्षा च पूर्वोत्त- 6b/MA, राभ्यामपेक्षणं । आक्षेपोऽर्थाक्षिप्तार्थकथनं विजातीयव्यावृत्तिश्च । § 30 6b/MA

तदत्र वृ त्ति का रः श्लोकपातनिकां कुर्वन् प्रमाणभूतायेत्येतत्स्वयं व्याचष्टे । प्रमाणं जात इति भूतशब्दः प्रादुर्भावार्थः । तेनाजातमवस्थत्वान्न प्रमाणमित्यनन्तरमुक्तम्वक्ष्यते च । सर्वश्च शब्दोऽन्यत्र प्रयुज्यमानोऽन्तर्भूतोपमार्थः प्रयुज्यत इत्याह प्रमाणमिवेति [।] प्रमाणशब्दो ज्ञाने मुख्य इतरत्र तु केन साधर्म्येणोपमानोपमेयत्वमित्याह [।] 'अविसम्वादी'ति । प्राप्तिवाची तु भवतिः **स्पष्टार्थ** इत्यसौ न विवृतः प्रामाण्यं प्राप्तः प्रमाणभूत इति । § 31

522/s

ननु भावनाबलनिष्पन्ननिष्कल्पा विकल्पा विकल्पभ्रान्तज्ञानात्मकत्वाद् भगवतः प्रत्यक्षप्रमाणस्वभावता साक्षादस्त्येव किमुपचाराश्रयेणेति चेददोषोयं सविकल्पज्ञानावस्थाश्रयेणाभिधानादित्येके । इदन्त्वत्र युक्तं [।] यद्यपि यथोक्तप्रमाणात्मकः सदा भगवान् तथाप्यसंव्यावहारिकोसौऽवस्थाभेदस्ततः सांव्यवहारिकप्रमाणेनोपमीयते लोकबोधनाय [।] अमुनैव व्यवहरन्ति मुक्ता न लोकोत्तरेणातद्विप (क्ष)त्वादितरेषां । यथोक्तं [।] § 32

रूपणव्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ ।

ज्ञानं प्रत्यभिलापञ्च सदृशौ बालपण्डिताविति ॥§ 34

प्रमाणमविसम्वादि ज्ञानमिति । अविसम्वादित्वं ज्ञानत्वञ्चानूद्य प्रामाण्यं विधीयते । एतच्च प्रमाणद्वयव्यापिसामान्यलक्षणं [।] § 35

7a/MA यद्यपि चालम्बनमनुमानस्य भ्रान्तं प्रवृत्तिविषयस्तु वाध एवार्थः । सामान्यविशेषाकाराभ्यां स्वलक्षणस्यैव परिच्छेदादविसम्वादित्वं तुल्यं । अर्थक्रियासमर्थप्रतिबद्धलिङ्गापेक्षयानुमानस्य बाह्य एव प्रवृत्तेरिति तुल्यत्वं । § 36

ननु चाध्यक्षानुमानाभ्यामपि प्रवृत्तस्य कदाचित्प्रतिबन्धादिसम्भवाद्विसम्वादोपि । तदाभासाभ्यामपि काकतालीयन्यायेन सम्वादोपि । अतः कथमेतत्प्रमाणलक्षणं । § 37

न दोषः । सदैव प्रमाणाभ्यां प्रवृत्तस्य प्रतिबन्धादप्रतिबन्धादिसम्भवे नियतः सम्वादो न त्वेवं तदाभासेऽवश्यम्भावी सम्वादः । प्रमाणशक्तिर्वा प्रामाण्यं सा च प्रतिबन्धादावप्यस्ति प्रमाणयोर्न त्वेवं तदाभासयोरिति असाङ्कर्यमेव । द्विविधश्च सम्वादो ज्ञेयधर्मो ज्ञानधर्मश्च । अत्रार्थमुपलभ्य प्रवृत्ताविष्टार्थप्राप्तिः सम्वादो विषयधर्मः । अर्थसामर्थ्येन तत्सिद्धेः । तदाकारज्ञानोत्पत्तेस्त्वर्थक्रियाधिगतिर्विषयिधर्मः [।] सत्यपि बाह्येऽर्थे तद्व्यवस्थाश्रयं ज्ञानमेव तस्य स्वसम्विद्रूपतया बाह्यप्रकाशकं स्वयंप्रकाशरूपत्वात् [।] तदेवं विषयधर्मस्यापि सम्वादस्य सम्भवाज्ज्ञानग्रहणं कृतमित्येतत्कथयन्नाह । स पुनरर्थंपरिच्छेद्येत्यादि । स पुनस्संवादो विषयधर्म इत्यनेन सम्बन्धः । कदा पुनरसौ भवतीत्याह । अर्थस्य विच्छिद्य प्रवृत्ताविति । परिच्छेदः प्रमाणद्वयं । तत्तु इत्यत्रानयोः । प्रत्यासन्नकारणत्वमिति सूचयति । अयन्तु भेदः प्रत्यक्षाविकल्पकत्वान्न निश्चयः किन्तु तदाभासोत्पत्तेः । अनुमाने तु निश्चय एव । 7b/MA यद्येवं प्रत्यक्षेणाविकल्पेन मिथ्याफलवादिनां विवेकस्य कर्त्तुमशक्यत्वात्कथं ततोऽर्थं परिच्छिद्य प्रवृत्तिरिति चेद् [।] उच्यते [।] द्विधा प्रत्यक्षाश्रया प्रवृत्तिराद्याभ्यासवती च । तत्र याऽद्या सार्थगता तत्राभ्याससामर्थ्याद्यथाविषयमधिगतपाटवं सदसन्मणिरूप्यादिज्ञानवदुत्पद्यमानं यथावस्त्वेवाकारं 523/s परिच्छि न्ददुत्पद्यते । तदाकारसम्वेदनश्च बाह्यार्थाधिगतिः सम्विन्निष्ठत्वादर्थस्थितेर्नियताकारञ्च वेदनं द्वैराश्येनार्थानां व्यवस्थापकम् [।] एतद्वशाच्च विधिप्रतिषेधविकल्पः । इदमुपलभे इदं नोपलभ इति भवति । तथा भूतं तत्स्वत एव प्रमाणं पुरुषं बाह्येऽर्थे प्रवर्त्तयतीत्यर्थं परिच्छिद्येति वचनं घटत एव [।] अनिश्चितविवेकस्य तु कारणपरिशुद्धिद्वारेण प्रवृत्ति (ः।) अत्रापि योऽसमर्थस्तस्य संशयेनैव प्रवृत्तिः । कथन्तर्हि परिच्छिद्येति वचनं एतन्मतेनेति चेद् [।] उक्तमत्र तदाकारोत्पत्तिमात्रेण तथा व्यपदेश इति । संशयेन प्रवर्त्तमानः कथं प्रेक्षापूर्वकारीति चेत् । को विरोधोत्र [।] न हि य एव निश्चयेन प्रवर्त्तते स एव प्रेक्षापूर्वकारी । तथा हि प्रवृत्तौ हेतुद्वयमर्थसंशयोऽर्थनिश्चयश्च । निवृत्तावपि द्वयमेवानर्थनिश्चयोऽनर्थसंशयश्च । तत्राद्येन हेतुद्वयेन यः प्रवर्त्तते निवर्त्तते च पश्चाद् येन स प्रेक्षापूर्वकारी भण्यते लोके । यदि च निश्चयेनैव प्रवृत्तिस्तदा कृषीबलादीनां कृष्यादिष्वप्रवृतिः । न हि तेषामनागतशस्यादिनिष्पत्तौ निश्चायकं प्रमाणमस्ति । § 38

किं रूपोऽसौ विषयधर्मः सम्वाद इत्याह [।] यथा समीहिते त्यादि यथा येन रूपेण सा § 39

# ४ ४

१।२ तदेवमुपादेयस्य भगवत्प्रवचनार्थस्य साधकन्तदन्यस्य हेयार्थस्य वाधकमनुमानमाचार्यदि ग्ना गे नोक्तं त्रिरूपाल्लिङ्गतोऽर्थदृगि (ति ।) अत्र तद्विषयञ्चाथ शब्दवाच्यमन्यापोहमशेषसंख्यादिविप्रतिपत्तिनिराकरणतः प्रथमं प्रथमपरिच्छेदेन शास्त्रकृद् व्याख्यातवान् । अनुमानमेव साधकं (प्रवचनार्थस्य) तीर्थ्यागमस्य वाधकञ्च न प्रत्यक्षं [।] तस्य सन्निहितविषयत्वात्तत्स्वरूपस्य चानुमानेनैव व्यवस्थानात्सर्वविमतीनाञ्चानेनैव निराकरणात् [।] तथा हि त्रिरूपमेव लिङ्गन्नैकलक्षणादिकं [।] न च दर्शनादर्शनमात्रेण हेतुर्गमकः किन्तु प्रतिबन्धात् [।] स च द्विरूपो नार्थलक्षणो विरोधस्य [परस्य न परिहारस्त्विति लक्षणोऽभावः कथं भावात्मकः स्यात् वह्निना सहानवस्थित्या आलोकः कथमनुकाराज्जायेत । अनुकारिण.. ] चात्रैवान्तर्भावात् [।] तथान्यापोह एवानुमानस्य विषयो तद्रूपपरावृत्तवस्तुमात्रप्रसाधनान्न परपरिकल्पितं व्यतिरिक्ताव्यतिरिक्तादिरूपं सामान्यं [।] न च विधिमुखेन शब्दे वाचकः किन्त्वन्यव्यवच्छेदेनाभाव [भावव्यवच्छेदवाचकत्वात्] इव भावेप्यन्यव्यव [अब्राह्मणानीत्यादौ पर्युदासे]च्छेदबलादेव च विशिष्टार्थप्रतीतेरन्यथा यत एव विजातीयान्न निवर्ततं सोऽन्यरूपोपि स्यात् [।] तद्रूपवत्स्वरूपवद्वाऽन्य (ः) स्यादनिवृत्तेर्न चापौरुषेयः शब्दस्तस्य विवक्षाकार्यत्वादिति सर्वमत्र प्रथमपरिच्छेदे प्रोक्तं [।] तदेवम् [।] § 40
524/s

अनुमानं द्विधा स्वार्थं त्रिरूपाल्लिङ्गतोर्थदृक् [।]
पूर्ववत् फलमर्थः स्वरूपश्चातुल्यमेतयोरिति [॥]§ 42

अत्र प्र मा ण स मु च्च ये द्वितीयपरिच्छेदश्लोके पूर्ववदिति प्रत्यक्ष इव विषयाधिगतिरूपं प्रमाणादव्यतिरिक्तं फलमनुमानेपि ज्ञेयमर्थस्त्वालम्बनं प्रत्यक्षस्य स्वलक्षणमितरस्य तु सामान्याकारोन्यापोहो विषयः स्वरूपञ्च स्पष्टास्पष्टप्रतिभासमतुल्यं प्रत्यक्षानुमानयोरित्येतद्वक्ष्यमाणानुमिति त्यक्त्वातिविवादास्पद.. [।] § 43

# ५ ५

२।१ अधुना शेष प्र मा ण स मु च्च य प्रथमद्वितीयपरिच्छेदव्याचिख्यासुस्तदादिनमस्कारश्लोकं च व्याख्यातुं शास्त्रकारो द्वितीयप- 2a/MA

रिच्छेदं प्रस्तौति । अनन्तरञ्चागमचिन्तायाम ३।२१२ पौरुषेयमागममपाकृत्य यत्प्रतिज्ञातं सर्वस्य दृष्टादृष्टप्रकर्षार्थस्य स्वर्गापवर्गादेः परलोकस्य च देशकः पुरुषातिशय एवेति स इदानीं प्रमाणभूतः साध्यते नेश्वरादिरिति कथ्यते प्रवचने चार्यसत्यचतुष्टयं दुःखसत्यपूर्वकमुक्तं निरूपणक्रमेण [।] योगी हि सांसारिकदुःखार्त्तः प्रथमं दुःखसत्यं निरूप्य हेयोपादेयं सोपायं पर्येषत इति कृत्वा शास्त्रकारस्तूत्पत्तिक्रममाश्रित्य यथा संसारः प्रवर्त्तते निवर्तते च तथा प्रथमं समुदयसत्यं तद्विमतिनिराकरणतः कथयंस्तदनुक्रमेण शेषसत्यत्रयमशेषविमतिनिराकरणतः कथयतीति द्वितीयपरिच्छेदार्थः । सर्वत्र च प्रेक्षावतां सम्बन्धं विना वाञ्छाप्रवृत्तिरिति पूर्वापरपरिच्छेदसंघटानार्थं सम्बन्धोऽवश्यवाच्यः [।] स चानन्तर्यलक्षणोऽनन्तराणामपि पूर्वैर्विद्यमानोपकारकत्वादानन्तर्यञ्च द्विधा ग्रन्थतोऽर्थतश्च [।] शास्त्रादेर्वागर्थरूपत्वात्तत्रानन्तरपरिच्छेदसम्बन्धोयं द्वितीयपरिच्छेद इति [।] § 44

## ६ ६

2b/MA

१।७ तत्त्वबोधासमर्थानां सद्वृत्या मानमेययोः ।
व्यवस्थानमिदं शास्तुः प्रवचोनुगमुच्यते ॥§ 46

ये पुद्गलाः परमार्थाधिगमे झटित्यसक्ता धर्मानुसारिणो योगिनश्च तेषां सत्संवृत्त्या प्रमाणप्रमेयव्यवस्थानं परमार्थेऽसंभवात् । यदाह नैयायिकचक्रचूडामणिः प्र मा ण वा र्ति के २।५ § 47

प्र (ा) माणं (?ण्यं) व्यवहारेण शास्त्रं मोहनिवर्त्तनमिति । § 48

भगवानपि परमार्थबोधेऽशक्तानवता (र) यितुमुक्तवात् क्षणिकाः सर्वसंस्कारा अनित्यदुःखशून्यानात्मा दीति । एतानि प्रमाणोपपन्नानीत्यपि प्रतिपादयितुमिदमुच्यते ॥ § 49

525/s

परस्य प्रतिपाद्यत्वादित्या ४।१ दि । परो हि किलावबोधयितुमिष्टो वादिना । स यदि स्वसिद्धेनोभयसिद्धेन वा वादिसिद्धेनापि स्वयमागमनसिद्धेनैव साध्यमवबोध्यते लिङ्गेन तदा वादिनः का क्षतिः [।] न हियं राजाज्ञा उभयसिद्धेनैव साध्यं साधनीयमिति । पञ्चविंशतितत्त्वसंख्यानकुशलाः सां ख्या ऊचुः बौ द्धा न् प्रति । अचेतनाः सुखादयो बुद्धिर्वा उत्पत्तेर्नित्यत्वाद्वा रूपादिवदिति । बौद्धेन ह्यान्तराश्चिद्रूपाश्च सुखादयो बुद्धिश्चेष्टाः । असद्वादी च बौद्धोऽसदेवोत्पद्यते कारणवशेन कार्योत्पत्तेः [।] न हि कार्यं स्वतन्त्रमुत्पद्यते निरन्वयञ्च नाशमिच्छति । सांख्यस्तु सद्वादी तस्य सदेव कार्यमुत्पद्यते बीजभावेन प्रागवस्थायामपि विद्यते [।] कार्यमाविर्भावस्तूत्पत्तिव्यक्तिरूप (ः) तिरोभावस्तु विनाशः । स च

सान्वयोऽन्वयिद्रव्यस्य विद्यमानत्वादिति पराभ्युपगतसाधनेनैव स्वभिमतम-चेतनत्वादिकं साधयतीति तदपनयार्थं स्वदृष्टग्रहणं । स्वयमिति वादिना । अदृष्टेपि न निश्चितः प्रमाणेनार्थ इति त्रिरूपं लिंङ्गं परैरिति प्रतिपाद्यतेऽनेन । आगमादितिश्लोकेनुमातुमपि पर । § 50

# ७ ७

अलमतिचपलत्वात्स्वप्नमायोपमत्वात्परिणतिरिव सत्वात्संगमेन प्रियायाः ।
§ 51

इति यदि शतकृत्वस्तत्त्वमालोचयामस्तदपि न हरिणाक्षीं विस्मरत्यन्तरात्मा ॥ § 52

# ८ ८ : अभावः

१।८५ अभावः । नैवाभावः कश्चित्सर्वेषां कथञ्चिद् भावादिति चेत् ।
यथा तेन सत्त्वं सप्रकारोऽभावः । शशविषाणयोश्चायं भावात् श- a/MA
शविषाणाभाववादिनमुपहसन्नात्मानमेवोपहसति । शशावयवभूतं विषाणन्नास्तीत्यभिघातनिकः प्रस्तावः । शशोप्यस्ति विषाणञ्चेत्युत्तरस्य । न ह्ययं विषाणमात्रमपह्नुते । यतस्तेन प्रतिरुद्ध्येत किन्तु शशसम्बन्धि । यद्येवं सम्बन्धो नास्तीति वक्तव्यं न विषाणम् । किम्वै सम्बन्धमात्रं विशिष्यते । विषाणिनामपि विषाणेषु द्रव्यस्वभावः । स्वभावोपि प्रतिकार्यं कारणभेदात् [।] तत्कोयं सम्बन्धाभावो वाच्य इत्युपालम्भः । अस्ति विषाणिनां विषाणस्वभावभेदो न तद्वत् किञ्चित् शशस्य भिन्नस्वभावं विषाणमिति चेत् । वयमप्येतदेव ब्रूमः । यो वा सम्बन्धो नास्तीतीष्यते स एवाभावः । सम्बन्धी विद्यते न सम्बन्ध इति चेत् निपुणा वाचो युक्तिः । अङ्गीकृतसम्बन्धं द्रव्य-
मपि नेति चेत् । प्रियमनुष्ठितं यदीदमेव प्रथममभिधीयते न परिक्लेशितो दे- 526/s
वानांप्रियः स्यादिति । विरुद्धाव्यभिचार्य्यपि संशयहेतुरुक्तः स प्रहनोक्तः (?) । अनुमानविषये तस्याभावात् । न हि संभवोस्ति कार्यत्वाभावयोरुक्तलक्षणयोरनुपलम्भस्य वा विरुद्धाव्यभिचारितायां । न चान्यो व्यभिचारी । तस्मादव (शि) ष्टबलप्रवृत्तमागमाश्रयमनुमानमाश्रित्य तदर्थविचारेषु विरुद्धाव्यभिचारी साधनदोष उक्तः । शास्त्रकाराणामर्थेषु भ्रान्त्या विपरीतस्वभावोपसंहारसम्भवात् । न हि अस्ति सम्भवो यथावस्थितवस्तुस्थितिस्वात्मकार्यानुपलम्भेषु । तत्रोदाहरणं सर्वगतं सामान्यं सर्वदेशावस्थितेः ॥... § 53

# ९ ९ : भूतचैतन्यमतनिरासः

१।३७ आस्तिकानां महाभूतव्यतिरिक्तं ज्ञानं संसरति जन्मान्तरेपि

। नास्तिकानान्तु महाभूताव्यतिरिक्तं दृष्टमात्रे ह्येवं ते प्राहुः । महाभूतानामेवाभिव्यक्तिविशेषो मदशक्तिवच्चैतन्यमिति । अभिव्यक्तं चैतन्यं यस्मिन्देहे स तथाभूतो देहः स्वभावो यस्य पुरुषस्य स तथा । पश्चाद् घटशब्देन द्वन्द्वः । निर्द्धारणे षष्ठ्याः सप्तम्या वा द्विवचनमेतत् । अवयवावयविसम्बन्धे वा षष्ठी । तयोरन्यतरेण घटेन पुरुषेण वा सह द्वितीयेन वर्त्तत इति च द्वितीयः । व्याजेन च महाभूताव्यतिरिक्तं चैतन्यं प्रयोगेण साधयति । अस्ति हि दृष्टान्तेऽनुत्पत्यात्मकस्य कुड्यस्यान्यतरेण घटेन सद्वितीयत्वमेकेनापि सद्वितीयत्वेऽन्यतरेण सद्वितीयत्वं सामान्येन सिद्धमिति न साध्येनान्वितं निदर्शनम् । तथा घटस्यापि साध्यधर्मिणोऽशेषघटपक्षीकरणे तेनैव सद्वितीयत्वमयुक्तमिति सामान्येनापि साधने तथाभूतेन पुरुषेण सद्वितीयत्वं पारिशेष्यात्सिध्यतीति मनो मन्यते । **अत्रे**त्यादि । तादृशस्य पुरुषस्यानुक्तावपि इच्छाव्याप्तस्य साध्यत्वात्तस्य चासिद्धत्वात् दृष्टान्तेऽनन्वयदोषः । साध्यसामान्येनेति । तादृशैव पुंसा विशेषणेन सद्वितीयत्वं साध्यते घटस्य यतो विशेषापेक्षया दोषद्वयं स्यात्किन्तु सामान्येनान्यतरसद्वितीयत्वं धर्मिणो वक्तुमिष्टमतोयमदोष इत्यसारम् । सामान्यस्यैवाभावात् । सद्वितीयं हि घटेन वा स्यादुक्तपुरुषेण वा । तत्र घटस्य साध्यधर्मित्वेनाश्रयणाम् नानेन सद्वितीयत्वमभेदात् भेदाधिष्ठानं हि सद्वितीयत्वं । नापि पुरुषेणानन्वयदोषादिति । एतदेवाह [।] **तदेव सामान्यं न सिद्ध्यती**त्यादि । अनाप्तैरभ्युपगम उक्तप्रकारेण देहेभ्योन्तरं नाभ्युपगम्यते परेणानन्वयादिदोषात् । **तुल्यं नाशेपी**ति । यथा हि घटेन घटस्य सद्वितीयत्वं विरोधात्साध्यमुपपद्यते । नापि तादृशा पुरुषेणानन्वयशङ्क्वेत्युभयाभावेन सामान्येन साधनं 527/s तथात्रापीत्याह । **घटशब्दभेदेने**त्यादि । न शब्दे शब्दानित्यत्वं सा ध्यम- b/MA नन्वयाशङ्क्या । नापि घटा  नित्यत्वं शब्दे साध्यमसंभवात् । यदि च घटानित्यत्वं शब्दं प्रति ज्ञायते तदाभ्युपेतविरोधः । शब्दे घटानित्यत्वस्यानभ्युपगमात् । आदिशब्दादनुमानविरोधोप्यन्यधर्मस्यान्यत्र बाध्यमानत्वात् । शब्दभेदेन च कल्पने साध्यविकलतादोषो दृष्टान्ते । असिद्धेन विनाशेनेति । धर्मिविशेषापरिग्रहेण विनाशसामान्यस्य सिद्धत्वात् । **तद्वत** इति विनाशवतः । § 54

अन्येनैव प्रकारेण सद्वितीयत्वप्रयोगेऽन्ववैकल्यादिकमस्माभिरुक्तं तया त्वन्यथैव परिकल्प्य तुल्यदोषतापादनं कृतमित्येतत्कथयितुमाह । **न ही**त्यादि । अन्यतरार्थान्तरत्वं सामान्यं घटे साध्यधर्मिणि कुड्ये च दृष्टान्तधर्मिणि उपनीतमिति प्रतिक्षिप्तं साध्यमिष्टं परस्य साध्यधर्मिगतम्वान्यतरार्थान्तरत्वं साध्यं दृष्टान्तधर्मिगतम्वेति यावत् । कुतो नानात्वे सति नानत्वेति तत् (?) न ह्यत्रान्यतरार्थान्तरत्वं कुड्यधर्मो घटेस्ति साध्यं नापि घटधर्मः कुड्ये साध्यमिष्टमन्वेतीति साध्यवैकल्यादिकं व्रूमो येन तुल्यदोषता स्यात् साध्यधर्म एव तादृश इति [।] यथोवतपुरुषघटापेक्षयान्यतरार्थान्तरभावलक्षणः निरूप्यमाणो न सिद्धोस्ति [।] न हि घटस्यार्थान्तरभावो

विरोधात् । देहस्याप्यनन्वयाशङ्कया नेष्यते तेनेत्येतावता सामान्येन शब्दः साध्यतेऽयोगव्यवच्छेदेन केनचिदनित्यत्वेनायोगमिच्छन्तीति तत्संबन्धः साध्यते [।] **तथार्थान्तरभावे स्यात् तद्वान् कुम्भोपी**ति सूत्रं व्याख्यातुमाह । **अन्यतरार्थान्तरभावस्त्वि**ति । तु शब्दो विशेषे । यथाऽनित्यत्वं वस्तुधर्मो न तथा सद्वितीयत्वं वस्तुधर्मः । इच्छाबलेन च व्यवस्थापनात् । न ह्येतत्कार्यं स्वभावो वा भावस्य युज्यते त्विच्छाबलेन संचार्यार्थान्तरत्वेपि वर्त्तमानत्वात् । तद्वान कुम्भ इत्यस्य विवरणमन्यतरसद्वितीयघट इति .... § 55

# १० १०: हेतुः

३।१ कान्तिक एव प्राणादिः । साधारणमपि खलु प्रमेयत्वमसंस्कृताप- b/MA
वादिनः । असमन्वययोगात् । अव्यभिचारितान्वयः स पक्ष एवास्तीति । § 56

अन्वयिनमेव हेतुमाह । अत्रापि कथमव्यतिरेको विपक्षात् । कथम्वा सपक्ष एवास्तीति । किं (सप) क्षस्यावधारणस्य फलं यदि न विपक्षेऽस्तित्वं व्यवच्छिद्यते व्यवच्छेदे वा कथमव्यतिरेकः । न हि सत्ता प्रतिषेधादन्यो व्यतिरेकः । विप्रतिषिद्धं चैतत् । नान्वयो न व्यतिरेक इति । य एव खलु नेत्यन्वयप्रतिषेधः स एव व्यतिरेक इति । तत्पुनरिदमायातमसतोव्यतिरेकायोगादिति । अत्रेदमेव पुनर्वाच्यं कथमसतोऽन्वयप्रतिषेध इति वस्तुरूपानुकर्षी खल्वसति प्रतिषेधो न सम्भवेत् । न हि पर्युदास एवैको 528/s
नञो विषयः । किन्तर्हि [।] प्रत्यक्षप्रतिषेधोपि । न हि तस्यासति विरोधः । सो पि न सम्भवति । अधिकरणाद्यर्थानां प्रतिषेधविषयोपदर्शिनीनां विभक्तीनामयोगादिति चेत् । उक्तोत्तरमेतत् । तस्मान्न हेतुः कश्चिदन्वयी नाम । न च प्रमेयत्वस्य विपक्षेऽन्वयात्मा सः । त्रिविधो हि धर्मो भावाभावोभयाश्रय इत्युक्तः । नाभावस्य कश्चिद्धर्म इति चेत् । नन्वयमेवास्य धर्मविरहो धर्मः । न हि वस्तुरूपमेव धर्मा असन्तोपि हि केनचित्प्रकरणेन इमं व्यवहारमुपनीयन्ते । अन्यथा हि तत्राव्यवहार एव स्यात् । न च सतामपि परमार्थतः कश्चिद्धर्मधर्मिभावः । केवलं बुद्धिरेव सम्बन्धमुपरचयतीत्युक्तं वा र्ति के । बुद्धिकृता च घटनाऽसत्सु केन वार्यते । सदसदुभयानुभयव्यवस्थाश्च तदतत्समयवतामनिश्चितसाधना नैकान्तग्राहिण्यः स्युस्तस्माद्यथा कथञ्चिदप्यनेना (सत्ता) निश्चिताः । प्रमेयास्ते वक्तव्याः । न हि भावविषयमेव प्रमाणं । अविसंवादलक्षणत्वात्प्रमाणस्य । उल्लसती तद्वारे न व्यवस्थापयेत् । न चेत्स्वविषये परेण वाध्येत । तदन्यप्रमाणलक्षणमस्तीति

प्रमेयो..........। § 57

# ११ ११

a/MA अभिप्रायाविसंवादा २।५६दि । **मणिप्रदीपप्रभ**योरि २।५७ त्यादि वा र्तिक श्लो क द्वयवृत्तौ वक्ष्यते । § 58

केचिदाहुः [।] यदि मणिप्रभायां मणिज्ञानं भ्रान्तमपि सम्वादादनुमानमिष्यते [।] प्रमाणमविसम्वादिवचनात् तदा प्रत्यक्षानुमानव्यतिरिक्तं तृतीयमिदं प्रमाणमापतितं [।] तथा हि मणिप्रभायां मणिबुद्धेर्न प्रत्यक्षं भ्रान्तत्वात्सविकल्पकत्वाच्च । प्रत्यक्षत्वं ह्येतद्विपरीतं । नाप्यनुमानमलिङ्गजत्वात् । न चाप्रमाणं वस्तुसम्वादात् । § 59

अत्रोच्यते । अनुमानमेवैतत् [।] तथा हि सामान्यमनुमानस्य लक्षणमनन्तरं स्थापयिष्यते [।] परोक्षस्याप्यन्यतः सम्बन्धाप्रतिपत्तिरनुमानमिति । इह च मणौ मणिप्रभासम्बन्धात्तत्कार्यत्वात् तस्याश्च प्रभायं मणिभ्रान्तिरुत्पद्यते [।] ततः कार्यलिङ्गजत्वादनुमानमेव । तथाहि [।] मणिप्रभायामादावभ्रान्तमेव चक्षुर्विज्ञानमुपजायते । तेन च कार्यलिङ्गस्वरूपमधिगतं यतः स्वलक्षणमेव लिङ्गं । तादात्म्यतदुत्पत्तिभ्यां च गमकत्वं स्थितं । न च कल्पितरूपस्यान्यत्वं । तादात्म्यतदुत्पत्ती वा स्तः । § 60

कथं स्वलक्षणेनान्वय इति चेत् । न ब्रूमस्तेनैवेति किन्तु तज्जातीयेन स्वलक्षणान्तरेण । तथा चोक्तं [।] तज्जातीयोपि हि नामाभेदविवक्षायां स एवेति [।] तस्मात् समानजातीयस्वलक्षणान्येव विजातीयव्यावृत्युपाधिकानि साकल्येनापेक्षितानि सामान्यमित्युच्यन्ते । यत्रापि कृतकत्वादयो व्यवस्थाप्य-
529/s न्ते तत्रापि मूढ प्रतिपादनोपायविधानार्थो धर्मधर्मिविभागः [।] गमकन्तु लिङ्ग स्वलक्षणमेव [।] तथा चाह [।] धर्मधर्मितया भेदः कल्पितो
b/MA नार्थोपीति । धूमाल्लिङ्गाल्लिङ्गि- नि ज्ञानमुत्पद्यमानं न धूम एवाध्यारोपेण प्रवर्त्तते किन्त्वन्यत्र प्रदेशे । मणिभ्रान्तिस्तु मणिप्रभाख्य एव लिङ्गे लिङ्गिनमारोपयन्तीति चेत् । ततः किं न (:) हीयतां [।] सम्बन्धादुत्पन्नत्वं हीयते देशभ्रान्तिरत्राधिकेत्येतावत्तु ब्रूमः [।] तत्रैव देशे मणिप्राणकत्वे माभूत्प्रामाण्यं मणिमात्रप्रापणे तु केनानुमानत्वं वार्यते [।] सर्वञ्चानुमानं भ्रान्तमिष्यत एव । मणिभ्रान्तावन्वयव्यतिरेकस्मरणन्नास्तीति चेत् । यदि नास्ति न तावतानुमानत्वाभावः यो ह्यन्वयव्यतिरेकावस्मृत्वा द्रागेव धूमाद्वह्निं प्रत्येति तदा किं तज्ज्ञानमनुमानं नेष्यते । त्रिरूपात्तु लिङ्गात्तदुत्पद्यत इत्येतावतानुमानमिति ब्रुमः । यद्यनुमानमेव मणिप्रभायां मणिभ्रान्तिः किमर्थं तर्हि सा दृष्टान्तीक्रियते [।] न ह्यनुमानस्य सामान्येनाविसम्वादे साध्येऽनुमानस्यैव दृष्टान्तत्वं युक्तं । अयमप्यदोषो यतो मणिभ्रान्ते भ्रान्तत्वेपि परो वक्तृविसम्वादमात्रमिच्छति । अन्यस्य तु धूमादिलिङ्गस्याभ्रान्तत्वं वस्तुप्रतिभासित्वं चान्यथा ह्यविसम्वादित्वं न स्यादित्यतो मणिभ्रान्तिर्दृष्टान्त-

त्वेनोपादीयते इति । तदेतद्बहुतरञ्च दुःखञ्च दुरुपपादञ्च विसम्वादकञ्चासम्बद्धञ्चचेति न विदुषां प्रीतिकरमिति वयमत्र ब्रूमः ॥ ॥ ॥ ॥ § 61

मणिप्रभायां मणिज्ञानं न प्रमाणं सत्यार्थाजनितत्वान्न प्रत्यक्षं । नाप्यनुमानं तल्लक्षणाभावात् । यो हि यल्लक्षणहीनः स तेन रूपेण व्यवह्रियते 8a/MA यथा गौर्वाजिरूपेणेत्यतिप्रसिद्धमेतत् [।] त्रिरूपाल्लिङ्गान्निश्चितादनुमेये ज्ञानमनुमानं [।] तदत्र नान्वयो [।] न हि या या प्रभा सा सर्वा मणिरित्यन्वयः सिद्ध्यति [।] नापि व्यतिरेको [।]यो मणिर्न भवति स प्रभापि न भवतीति । व्याप्यव्यापकभावासिद्धेः । नापि पक्षत्वं मण्याकारज्ञानस्य प्रभाजनितस्य मिथ्यात्वात् । न चागृहीतसम्बन्धो लिङ्गादनुमेयं प्रत्येति । योप्यविधानेन द्रागेव प्रत्येति स पूर्वमेव गृहीतसम्बन्धोऽनुमेयं लिङ्गात्प्रतिपद्यतेऽन्यथा प्रतिपत्तेरयोगात् । नापि धूमवद्वह्नेः कार्यत्वेन मणेः प्रभा प्रतिभासते कारणरूपेणैव तस्याः प्रतिभासनाज्ज्ञापकत्वाच्च [।] निश्चितं लिङ्गं भवति नानिश्चितं सन्दिग्धधूमवत् [।] न चात्र निश्चयोस्ति मिथ्याज्ञानत्वात् । § 62

यत्तूक्तं [।] प्रभायामभ्रान्तमेव चक्षुर्विज्ञानमादौ जायते तेन कार्यत्वं प्रभाया निश्चीयत इति [।] तदेतदतिसाहसमिन्द्रियज्ञानमेवेदं स्पष्टत्वात् विरक्तज्ञानवत् भ्रान्तमिन्द्रियादिदोषात् प्रभां मणिरूपेणाविच्छिन्ददुत्पद्यते [।] न च तत्र प्रभाकारो वेद्यते [।] न चासम्वेद्यमानाकारमालम्वनं सर्वेषामालम्वनत्वप्रसंगात् [।] न चेयं मानसी भ्रान्तिरिन्द्रियदोषनिवृत्तौ पुनः 530/s स्वरूपेणैव विषयग्रहणात् । न च तादात्म्यप्रतिबन्धो मणिप्रभयोर्भेदात् विषयो चाधिगते ज्ञानस्य प्रमाणाप्रमाणत्वञ्चेति । § 63

तेन हि निर्विषया कस्यचित्प्रवृत्तिरस्त्यत्र च मणिज्ञानं प्रभाविषयं न 8b/MA च प्रभा मणिर्येन यथाध्यवसायं प्रवर्त्तमानः स कृती स्यात् । अनुमानन्तु लिङ्गरूपतां न व्यभिचरति [।] अनर्थजन्यतया च तन्मिथ्याज्ञानं भ्रान्तन्तु सामान्याकारेणाविजातीयव्यावृत्तरूपता हि वस्तुनः स्थितैवान्यथा विजातीयतद्रूपमपि तद्वस्तु स्यादिति तदाकारो वस्तुसन्धायी । प्रभायान्तु न मणिरूपता विजातीयव्यावृत्तरूपास्ति प्रभामात्रालम्बनत्वात् [।] अनुमानस्य त्वनुमेयाकारत्वेन वस्तुसंस्पर्शात् [।] सति प्रतिबन्धे प्रामाण्यं प्रभायान्तु मणिज्ञानं नैवमिति नेदमनुमानम् [।] अत एव वादिप्रतिवादिप्रसिद्धपक्षाद्बहिःस्थितमिति दृष्टान्तीकृतं प्रतिबन्धस्यात्यन्तमाहात्म्यप्रदर्शनार्थं यदेवं प्रकारमविसम्वादकं परमार्थेन त्वप्रमाणमेवेदमित्यन्तं मिथ्याज्ञानत्वादत एव शास्त्रकारो वक्ति । § 64

मिथ्याज्ञानाविशेषेपि विशेषोऽर्थक्रियां प्रतीति । § 65

एतदेव व्याचष्टे । अत्र हि मिथ्याज्ञानात्प्रदीपप्रभायां मणिरूपेण ग्रहणान्नेदं विशिष्यते किन्तु मिथ्याज्ञानमेवेदं कपा.......पुटकुञ्चिकाविवरदृश्यमानायां प्रदीपप्रभायां मणिज्ञानवत्[।]मिथ्याज्ञानत्वमनूद्य व्यतिरेकमाह[।] विशेषोऽर्थ क्रियां प्रतीति । अपिशब्दस्त्वत्रातिशये । तदेवं शास्त्रकारवचनं

न्यायञ्चोल्लंध्य यत्प्रामाण्यप्रतिपादनं तदत्र कपटप्रकटनमित्यसारविचाराद्विरम्यते ॥ § 66

# १२ १२

एवमपि यदा सम्वति(?) तदानुमानस्य सुतरामविसंवादः [।] § 67

# १३ १३

१।३७ यद्यप्यपूर्वसत्वाप्रादुर्भावो बुद्धाश्चापर्यन्तास्त्र्यध्वसु तथापि न संसारक्षयोस्त्याकाशाक्षयतापर्यन्ततेव । एकैकस्यां दिश्यन्तत्वात्सत्ववाहोः ॥ § 68

अन्यत्र गतचित्तोपि चक्षुषा रूपमीक्षते ।
तत्संकेताग्रहस्तत्र स्पष्टस्तज्जा च कल्पना ॥ § 70

सामान्यवाचिनः शब्दास्तदेकार्था च कल्पना ।
अभावे निर्विकल्पस्य विशेषाधिगमः कथम् ॥ § 72

तदुपेक्षिततत्वार्थैः कृत्वा गजनिमीलनम् ।
केवलं लोकबुद्ध्यैव बाह्यचिन्ता प्रतन्यते ॥ § 74

531/s

को वा विरोधो बहवः संजातातिशयाः पृथक् ।
भवेयुः कारणं बुद्धेर्यदि नामेन्द्रियादिवत् ॥ § 76

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यताम्विदुः ।
आस्वाद्य कोपि लवणं जलमेकदेशे सर्वं तथेति लवणाम्भसि वेत्ति यद्वत् ।
धूमं महानसभवाग्निभवम्विदित्वा सर्वन्तथेति निपुणस्त्विगत्यवैति (?) ॥ § 79

येषु सत्सु भवत्येव यत्तेभ्यो ह्यस्य कल्पने ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः ॥ § 81

रूपगन्धरसस्पर्शसमुदायघटे यथा ।
पृष्ठजस्यावसायः स्याद्रूपग्राहिणि चाक्षुषे ॥ § 83

अधिकोवसायोध्यवसायः धूममेकं दृष्ट्वा सर्वं
वह्निमध्यवसितवान् ॥[§ 84]

अनुपलम्भसहायेन प्रत्यक्षेण मयाग्निजन्मा धूमः परिच्छिन्न इति सकलतदन्यापोढव्यक्तिजातमन्तर्भाव्यैव तद्बतोत्पन्नस्याध्यवसायस्य सम्वेदनात् । चक्षुर्विज्ञानेन रूपमात्रं दृष्टं तद्बलोत्पन्नपृष्ठजेन विकल्पेन रूपगन्धरसस्पर्शसमुदायो घटो मया दृष्ट इत्यध्यवसीयते । अत्र विप्रतिपत्तौ प्रमाणव्यवहारोच्छेदः स्यात् । [§ 85]

अनुमानपत्र---१५ [§ 86]

सर्वज्ञमिति---२५ [§ 87]

प्रत्यक्ष---४४ [§ 88]

परार्थानुमान---५५ [§ 89]

# The TEI Header

```xml
    <teiHeader xmlns="http://www.tei-c.org/ns/1.0" xml:lang="en">
  <fileDesc>
    <titleStmt>
      <title type="main">Pramāṇavārttika Pariśiṣṭa 1</title>
      <title type="sub">Appendix I to the Pramāṇavārttika</title>
      <author>Vibhūticandra</author>
      <funder>German Research Foundation (DFG); Project "SARIT:
      ↪  Enriching Digital Text Collections in Indology" (Bilalteral Digital
      ↪  Humanities Programme DFG/NEH), 2013-2017</funder>
      <principal>

            <persName>Birgit Kellner</persName>

          </principal>
      <respStmt>
        <resp>data entry by</resp>
        <name key="name swift">SWIFT Information Technologies,
        ↪  Mumbai</name>
      </respStmt>
      <respStmt>
        <resp xml:id="sarit-encoder-pvp.1">prepared for SARIT
        ↪  by</resp>
        <persName ref="https://viaf.org/viaf/308710472/">Liudmila
        ↪  Olalde</persName>
      </respStmt>
    </titleStmt>
    <editionStmt>
      <p> </p>
    </editionStmt>
    <publicationStmt>
      <publisher>"Project SARIT: Enriching Digital Text Collections in
      ↪  Indology" (Bilalteral Digital Humanities Programme
      ↪  DFG/NEH), 2013-2017.</publisher>
      <idno>2014-12-10</idno>
      <availability status="restricted">
        <p>Copyright Notice:</p>
        <p>Copyright 2014-2017 SARIT</p>
        <licence>

              <p>Distributed under a <ref
              ↪  target="https://creativecommons.org/licenses/by-
              ↪  sa/4.0/">Creative Commons Attribution-ShareAlike
              ↪  4.0 International licence.</ref> Under this licence, you
              ↪  are free to:</p>

              <list>
```

<item>Share — copy and redistribute the material in any
↪ medium or

format.</item>
<item>Adapt — remix, transform, and build upon the
↪ material for any

purpose, even commercially.</item>
</list>

<p>The licensor cannot revoke these freedoms as long as
↪ you follow the

license terms.</p>

<p>Under the following terms:</p>

<list>
<item>Attribution — You must give appropriate credit,
↪ provide a link to

the license, and indicate if changes were made. You may do so in
↪ any

reasonable manner, but not in any way that suggests the licensor

endorses you or your use.</item>
<item>ShareAlike — If you remix, transform, or build upon
↪ the material,

you must distribute your contributions under the same license as
↪ the

original.</item>
</list>

<p>More information and fuller details of this license are
↪ given on the

Creative Commons website.</p>

</licence>
<p>SARIT assumes no responsibility for unauthorised use that
↪ infringes the

rights of any copyright owners, known or unknown.</p>
</availability>
<date>2014</date>
</publicationStmt>

```
<sourceDesc>
  <bibl type="appendix" xml:id="pvv-sankrtyayana-app1">

      <title level="a">Appendix I</title>

      <title level="m">
    <persName>Dharmakīrti</persName>'s Pramāṇavārttika with
    ↪   a commentary by
    ↪   <persName>Manorathanandin</persName>
  </title>

      <author>Vibhūticandra</author>

      <editor xml:id="pvp-rs">Rāhula Sāṅkṛtyāyana</editor>

      <biblScope unit="pp">515-531</biblScope>

      <publisher>Bihar and Orissa Research Society</publisher>

      <pubPlace>Patna</pubPlace>

      <date>1938-1940</date>

      <note>Appendix to the Journal of the Bihar and Orissa
      ↪   Research Society, <ref target="http://east.uni-
      ↪   hd.de/buddh/ind/41/119/194/">http://east.uni-
      ↪   hd.de/buddh/ind/41/119/194/</ref>.</note>

      <note>The appendix contains notes that Vibhūticandra
      ↪   added to the manuscript of Manorathanandin's
      ↪   commentary. The manuscript consulted by Sāṅkṛtyāyana
      ↪   is described below.</note>

     </bibl>
  <msDesc>
    <msIdentifier>
      <idno/>
      <altIdentifier>
        <idno>Manuscript nr. 237 (henceforth MA).</idno>
        <note>In: <bibl>Sāṅkṛtyāyana, "Second Search of Sanskrit
        ↪   Palm-leaf Mss. in Tibet". JBORS 23,1 (1937)
        ↪   1-57.</bibl>
        </note>
      </altIdentifier>
    </msIdentifier>
    <msContents>
      <msItem>
        <author>Manorathanandin</author>
        <title>Pramāṇavārttikavṛtti</title>
```

```
        </msItem>
      </msContents>
      <physDesc>
        <objectDesc>
          <p>Written by Vibhūticandra in early old Bengali script
          ↪ (Sāṅkṛtyāyana refers to the script as Kuṭilā), the
          ↪ manuscript comprises 105 leaves of seven lines each that
          ↪ according to Sāṅkṛtyāyana measure 67.31 x 5.80 cm.</p>
        </objectDesc>
      </physDesc>
      <history>
        <p>On July 28, 1936, Sāṅkṛtyāyana found this paper manuscript
        ↪ of

      Manorathanandin’s Pramāṇavārttikavṛtti in the hermitage Zha lu ri
      ↪ phug.</p>
      </history>
    </msDesc>
  </sourceDesc>
</fileDesc>
<encodingDesc>
  <p>In the source file, there were two types of line breaks: returns (and
  ↪ possible

  surrounding space) and hyphens+returns. These were

  replaced with lb-elements. I didn't check whether

  the source was consequent in this respect. The ed-attribute ”s” refers to

  <ref target=”#pvv-sankrtyayana-book”>Sāṅkṛtyāyana's
  ↪ edition</ref>.</p>
  <p>The folio numbers on the margins were encoded as pb-elements.
  ↪ The ed-attribute ”MA”

  refers to the manuscript used by Sāṅkṛtyāyana.</p>
  <p>The text consists of 14 div's, which follow Sāṅkṛtyāyana's division
  ↪ of the text.</p>
  <p xml:id=”pvp-head”>The section number at the beginning of the
  ↪ first paragraph of each section (e.g. ” --”) was encoded as a
  ↪ head-element.</p>
  <p>The front has been added by SARIT.</p>
  <p>Brackets were encoded as follows:

  <list>
      <item>Headings in brackets were enclosed in
      ↪ &lt;supplied&gt;.</item>
      <item>Daṇḍas in brackets were enclosed in
      ↪ &lt;supplied.&gt;</item>
```

```
       <item>References in brackets were enclosed in &lt ;ref&gt ;.</item>
        <item>All other brackets were encoded as brackets.</item>
      </list>
    </p>
    <p>Bold characters were enclosed in &lt ;hi rend="bold"&gt ;</p>
    <p>Abbreviations used in the attributes ed, cRef and xml :id's in this
↪    file : <!-- this is a provisory list and has to be replaced by a
↪    refsDecl -->

    <list ana="abbreviations">
        <item>M-A = Sanskrit manuscript of Manorathanandin's
        ↪    Pramāṇavārttikavṛtti used

     by Sāṅkṛtyāyana</item>
        <item>ps = Pramāṇasamuccaya ; the verse numbers correspond to
        ↪    <ref ta-
        ↪    rget="http ://www.ikga.oeaw.ac.at/Mat/dignaga_PS_1.pdf">Steinkellner,

     Dignāga's Pramāṇasamuccaya, Chapter 1</ref>
        </item>
        <item>pv = Dharmakīrti's Pramāṇavārttika</item>
      </list>
    </p>
  </encodingDesc>
  <profileDesc><!-- ... --></profileDesc>
  <revisionDesc>
    <change when="2015-12-30"
↪    who="https ://viaf.org/viaf/308710472/">Added @xml :lang in
↪    front-element.</change>
    <change when="2016-05-27"
↪    who="https ://viaf.org/viaf/308710472/">Removed lb's after
↪    notes and the footnotereferences.</change>
    <change when="2016-05-27"
↪    who="https ://viaf.org/viaf/308710472/">Added headings to each
↪    section.</change>
    <change when="2016-05-27"
↪    who="https ://viaf.org/viaf/308710472/">Replaced brackets with
↪    add- and ref-elements.</change>
    <change when="2016-05-27"
↪    who="https ://viaf.org/viaf/308710472/">Updated encoding
↪    description.</change>
    <change when="2016-05-31"
↪    who="https ://viaf.org/viaf/308710472/">Replaced &lt ;add&gt ;
↪    with &lt ;supplied&gt ; and updated the encoding
↪    description.</change>
    <change who="https ://viaf.org/viaf/308710472/"
↪    when="2017-03-25">For a complete history of the changes in this
↪    file go to <ref target="https ://github.com/sarit/SARIT-
↪    corpus/commits/master/pramanavarttikaparisista-1.xml">SARIT
↪    GitHub Repository</ref>.</change>
```

</revisionDesc>
</teiHeader>